रजनीपुष्पः, पुं, (रजन्या हरिद्रायाः पुष्पमिव पुष्पमस्य ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥ (पूतिकरञ्जशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

रजनीमुखं, क्ली, (रजन्याः मुखम् ।) प्रदोषः । इत्यमरः । १ । ४ । ६ ॥ (यथा, राजतरङ्गिण्याम् । ४ । ४३३ ।
"ततः शशाङ्कधवले सञ्जाते रजनीमुखे ।
पार्थिनालभ्य भूपालं शय्यावेश्म विवेश सा ॥")

रजनीहासा, स्त्री, (रजन्यां हासो विकाशो यस्याः ।) शेफालिकापुष्पम् । इति शब्दरत्नावली ॥

रजसानुः, पुं, (रज्यतेऽस्मिन्निति । रञ्ज + "असानुः सहिमन्दिभ्यां रुधिरञ्जिभ्यां तु किदर्त्तेरशैश्च ।" इत्युणादिकोषटीकाकृत्स्वोक्तेः असानुप्रत्ययः ।) मेघः । चित्तम् । इत्युणादिकोषः । १ । १७४ ॥

रजस्वलः, पुं, (रजोऽत्रास्तीति । रजस् + "रजःकृष्यासुतिपरिषदो वलच् ।" ५ । २ । ११२ । इति वलच् ।) महिषः । इति मेदिनी । ले, १६३ ॥ (अस्य पर्य्यायो यथा,—
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः ।
पीनस्कः कृष्णकायोऽथ लुलापो यमवाहनः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥
त्रि, रजोयुक्तः । यथा, भागवते । ७ । १३ । १२ ।
"तं शयानं धरोपस्थे कावेर्य्यां सह्यसानुनि ।
रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥"
रजोगुणयुक्तः । स्पृहयालुः । यथा, मनुः । ६ । ७७ ।
"जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥")

रजस्वला, स्त्री, (रजोऽस्त्यस्याः । "रजःकृष्यासुतीति ।" ५ । २ । ११२ । इति वलच् । टाप् ।) रजोयुक्ता । तत्पर्य्यायः । स्त्रीधर्म्मिणी २ अवी ३ आत्रेयी ४ मलिनी ५ पुष्पवती ६ ऋतुमती ७ उदक्या ८ । इत्यमरः । २ । ६ । २० ॥ दूरिः ९ पुष्पहासा १० । इति शब्दरत्नावली ॥ पुष्पिता ११ अवीरा १२ विफला १३ निष्फला १४ । इति जटाधरः ॥ स्नाना १५ पांशुला १६ । इति राजनिर्घण्टः ॥ * ॥ अथ रजस्वलास्पर्शप्रायश्चित्तम् । "काश्यपः ।
'रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी तु या ।
त्रिरात्रेण विशुद्धिः स्यात् व्यासस्य वचनं यथा ॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणा च या ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी यदि ।
षड्रात्रेण विशुध्येत्तु ब्राह्मणी कामचारतः ॥
अकामतश्चरेदर्द्धं ब्राह्मणी सर्व्वजातिषु ॥'
एतेन रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः पञ्चगव्यपानं कामतः । अकामतस्तदर्द्धम् । नक्तव्रतम् । असवर्णरजस्वलास्पर्शे त्रिरात्रपञ्चरात्रषड्रात्रोपवासाः । अकामतस्तदर्द्धम् । एतत् चतुर्थाहानन्तरं कर्त्तव्यम् ।
'चाण्डालेन श्वपाकेन संस्पृष्टा चेद्रजस्वला ।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति ।
तां निशान्तु अतिक्रम्य स्नानात्कृत्यन्तु कारयेत् ॥'
इति वचनान्तरदर्शनात् एतत् कामतः ॥ अत्र दिनभेदोऽपि नास्ति । अत्रान्ने बृहस्पतिः ।
'पतितान्त्यश्वपाकैश्च संस्पृष्टा स्त्री रजस्वला ।
तान्यहानि अतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रं तु द्वितीये द्व्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत् ॥'
चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्ब्बम् । व्यासः ।
'रजस्वला यदा स्पृष्टा श्वजम्बूकखरैः क्वचित् ।
निराहारा भवेत्तावत् यावत् स्नानेन शुध्यति ॥'
अत्रापि बृहस्पत्युक्तदिनभेदव्यवस्था । वृद्धशातातपः ।
'रजस्वले तु ये नार्य्यावन्योन्यं स्पृशतो यदि ।
सवर्णे पञ्चगव्यन्तु ब्रह्मकूर्च्चमतः परम् ॥'
पञ्चगव्यपानं व्रतरूपम् । तेनोपवासः । ब्रह्मकूर्च्चमाह जावालः ।
'अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिवेत् प्रातर्ब्रह्मकूर्च्चविधिः स्मृतः ॥'
तदशक्तौ पुराणैकं दातव्यम् ।" इति प्रायश्चित्ततत्त्वम् ॥ * ॥ अन्यच्च ।
'शुद्धा भर्त्तुश्चतुर्थेऽह्नि अशुद्धा दैवपैत्रयोः ।
दैवे कर्म्मणि पैत्रे च पञ्चमेऽहनि शुध्यति ॥'
इति शुद्धितत्त्वम् ॥
तस्यां गमने पापं यथा,—
"प्रथमे दिवसे कान्तां यो हि गच्छेद्रजस्वलाम् ।
ब्रह्महत्याचतुर्थांशं लभते नात्र संशयः ॥
स पुमान्न हि कर्म्मार्हो दैवे पैत्रे च कर्म्मणि ।
अधमः स च सर्व्वेषां निन्दितश्चायशस्करः ॥
द्वितीयदिवसे नारीं यो व्रजेच्च रजस्वलाम् ।
कामतः परिपूर्णाञ्च ब्रह्महत्यां लभेद्ध्रुवम् ॥
आजीवनं नाधिकारी पितृविप्रसुरार्च्चने ॥
अमनुष्योऽयशस्यः स्यादित्याङ्गिरसभाषितम् ॥
तृतीयदिवसे जायां यो हि गच्छेद्रजस्वलाम् ।
स मूढो ब्रह्महत्याञ्च लभते नात्र संशयः ॥
पूर्ब्बवत् पतितः सोऽपि न चार्हः सर्व्वकर्म्मसु ।
असत्पुत्रा चतुर्थेऽह्नि न गच्छेत्तां विचक्षणः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५९ अध्यायः ॥
अपि च ।
"अपूर्णे ऋतुकाले तु योऽभिगच्छेद्रजस्वलाम् ।
रेतपाः पितरस्तस्य एवमेतन्न संशयः ॥
एकस्तु पुरुषो याति द्वितीयां काममोहितः ।
तृतीयां वा चतुर्थीञ्च तदा स पुरुषाधमः ॥
ऋतुकाले तु सर्व्वासां पित्रर्थं भोग इष्यते ।
ऋतुकालाभिगामी यो ब्रह्मचार्य्येव सम्मतः ॥
न गच्छति च यः क्रोधात् मोहाद्वा पुरुषाधमः ।
ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषस्तरन् ।"
इति वाराहे गुह्यकर्म्मवर्णनं नामाध्यायः ॥
(अपि च ।
"रजस्वलास्त्रीगमनमेतन्नरककारणम् ।
रजस्वलावीरान्नञ्च पुंश्चल्यन्नञ्च भक्षणम् ।
अभक्ष्यान्नञ्च विप्रर्षे यदन्नं वृषलीपतेः ॥"
तथा च ।
"रजस्वलामकामाञ्च मलिनामप्रियान्तथा ।
वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीड़िताम् ॥
हीनाङ्गीं गर्भिणीं द्वेष्यां योनिदोषसमन्विताम् ।
सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि ॥
सन्ध्यापर्व्वस्वगम्याश्च नोपेयात् प्रमदां नरः ॥
रजस्वलां प्राप्नवतो नरस्यानियतात्मनः ।
दृष्ट्यायुस्तेजसां हानिरधर्म्मश्च ततो भवेत् ॥"
इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः ॥)

रजिः, पुं, चन्द्रवंशीयराजविशेषः । यथा । "पुरूरवसो ज्येष्ठपुत्त्रस्यायुर्नामा । स राहोर्दुहितरमुपयेमे । तस्यां पञ्च पुत्त्रानुत्पादयामास । नहुषक्षत्रवृद्धरम्भरजिसंज्ञाः । रजेः पञ्च पुत्त्रशतान्यतुलवीर्य्यसाराण्यासन् ।" इति विष्णुपुराणे ४ अंशे । ८ । ९ अध्यायौ ॥ (राज्यम् । कन्याविशेषे, स्त्री । यथा, ऋग्वेदे । ६ । २६ । ६ ।
"त्वं रजिं पिठीनसे दशस्यन् षष्टिं सहस्रा
शच्या सचाहन् ।"
"रजिं एतदाख्यां कन्यां वा राज्यं वा ।" इति तद्भाष्ये सायणः ॥ रज्जुः । यथा, ऋग्वेदे । १० । १०० । १२ । "रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्य्यग्रं दुवस्युः ॥"
"रजिष्ठया ऋजुतमया रज्या रज्ज्वा ।" इति तद्भाष्ये सायणः ॥)

रजोबलं, क्ली, (रज इव बलति संवृणोतीति । बल + अच् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥

रजोरसं, क्ली, अन्धकारः । इति शब्दरत्नावली ॥

रजोहरः, पुं, (रजो हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इति अच् ।) रजकः । इति शब्दमाला ॥

रज्जुः, स्त्री, (सृज्यते रच्यते इति । सृज + "सृजेरसुम् च ।" उणा० १ । १६ । इति उः । असुमागमश्च । धातुसकारलोपश्च । आगमसकारस्य जश्त्वम् । दकारः । तस्यापि चुत्वम् । जकारः । इत्युज्ज्वलः । अप्राणिजातेश्चारज्ज्वादीनामिति कथनात् न ऊङ् ।) बन्धनसाधनवस्तु । दड़ी इति भाषा ॥ तत्पर्य्यायः । शुल्बम् २ वराटकः ३ वटी ४ गुणः ५ इत्यमरः । २ । १० । २७ ॥ शुल्बा ६ । इति भरतधृतरत्नकोषः ॥ शुल्वम् ७ शुल्वः ८ शुल्वा ९ शुल्वी १० सुश्रम् ११ वराटः १२ वटाकरः १३ वटीगुणः १४ । इति टीकान्तरम् ॥ (तस्या अपहरणे दोषो यथा, मनौ । ११ । १६९ ।
"कार्पासकीटजीर्णानां द्विशफैकशफस्य च ।
पक्षिगन्धौषधीनाञ्च रज्ज्वाश्चैव त्र्यहं पयः ॥")
वेणी । इति मेदिनी । जे, १४ ॥ (प्रत्यङ्गविशेषः । यथा, सुश्रुते शारीरस्थाने ५ अध्याये ।
"रज्जवः सेवन्यः सङ्घाताः ॥")